# shrIbhuvaneshvaryaShTakam

# શ્રીભુવનેશ્વર્યષ્ટકમ્

## Document Information

Text title : shrIbhuvaneshvaryaShTakam rudrayAmale

File name : shrIbhuvaneshvaryaShTakam.itx

Category : aShTaka, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Ravi Mukku ravi_mukku at hotmail.com

Proofread by : Ravi Mukku ravi_mukku at hotmail.com

Latest update : March 20, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીભુવનેશ્વર્યષ્ટકમ્

અથ શ્રીભુવનેશ્વર્યષ્ટકમ્ ।

શ્રીદેવ્યુવાચ -

પ્રભો શ્રીભૈરવશ્રેષ્ઠ દયાલો ભક્તવત્સલ ।
ભુવનેશીસ્તવમ્ બ્રૂહિ યદ્યહન્તવ વલ્લભા ॥ ૧॥

ઈશ્વર ઉવાચ -

શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ ભુવનેશ્યષ્ટકં શુભમ્ ।
યેન વિજ્ઞાતમાત્રેણ ત્રૈલોક્યમઙ્ગલમ્ભવેત્ ॥ ૨॥

ૐ નમામિ જગદાધારાં ભુવનેશીં ભવપ્રિયામ્ ।
ભુક્તિમુક્તિપ્રદાં રમ્યાં રમણીયાં શુભાવહામ્ ॥ ૩॥

ત્વં સ્વાહા ત્વં સ્વધા દેવિ ! ત્વં યજ્ઞા યજ્ઞનાયિકા ।
ત્વં નાથા ત્વં તમોહર્ત્રી વ્યાપ્યવ્યાપકવર્જિતા ॥ ૪॥

ત્વમાધારસ્ત્વમિજ્યા ચ જ્ઞાનજ્ઞેયં પરં પદમ્ ।
ત્વં શિવસ્ત્વં સ્વયં વિષ્ણુસ્ત્વમાત્મા પરમોઽવ્યયઃ ॥ ૫॥

ત્વં કારણઞ્ચ કાર્યઞ્ચ લક્ષ્મીસ્ત્વઞ્ચ હુતાશનઃ ।
ત્વં સોમસ્ત્વં રવિઃ કાલસ્ત્વં ધાતા ત્વઞ્ચ મારુતઃ ॥ ૬॥

ગાયત્રી ત્વં ચ સાવિત્રી ત્વં માયા ત્વં હરિપ્રિયા ।
ત્વમેવૈકા પરાશક્તિસ્ત્વમેવ ગુરુરૂપધૃક્ ॥ ૭॥

ત્વં કાલા ત્વં કલાઽતીતા ત્વમેવ જગતાંશ્રિયઃ ।
ત્વં સર્વકાર્યં સર્વસ્ય કારણં કરુણામયિ ॥ ૮॥

ઇદમષ્ટકમાદ્યાયા ભુવનેશ્યા વરાનને ।
ત્રિસન્ધ્યં શ્રદ્ધયા મર્ત્યો યઃ પઠેત્ પ્રીતમાનસઃ ॥ ૯॥

સિદ્ધયો વશગાસ્તસ્ય સમ્પદો વશગા ગૃહે ।
રાજાનો વશમાયાન્તિ સ્તોત્રસ્યાऽસ્ય પ્રભાવતઃ ॥ ૧૦॥

ભૂતપ્રેતપિશાચાદ્યા નેક્ષન્તે તાં દિશં ગ્રહાઃ ।
યં યં કામં પ્રવાઞ્છેત સાધકઃ પ્રીતમાનસઃ ॥ ૧૧॥

તં તમાપ્નોતિ કૃપયા ભુવનેશ્યા વરાનને ।
અનેન સદૃશં સ્તોત્રં ન સમં ભુવનત્રયે ॥ ૧૨॥

સર્વસમ્પત્પ્રદમિદં પાવનાનાઞ્ચ પાવનમ્ ।
અનેન સ્તોત્રવર્યેણ સાધિતેન વરાનને ।
સમ્પદો વશમાયાન્તિ ભુવનેશ્યાઃ પ્રસાદતઃ ॥ ૧૩॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીભુવનેશ્વર્યષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Ravi Mukku

*shrIbhuvaneshvaryaShTakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*